**DAV PUBLIC SCHOOL AIROLI**
**FIRST TERM EXAMINATION SAMPLE PAPER**
**2024 -2025**
**SUBJECT: SANSKRIT**
**Class: VIII**

---

**निर्देशा: > अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**

**> प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि ।**

**> प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।**

**> प्रश्नपत्रे उत्तराणि न लेखनीयानि।**

**> खण्डसङ्ख्या अपि लेखनीया।**

---

**खण्डः 'क'**

**(अपठित-अवबोधनम्) 10 अङ्काः**

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

भारतवर्षः कृषिप्रधान देशः अस्ति। अत्र अनेके जनाः ग्रामेषु निवसन्ति। कृषकाः कृषि- कार्य कुर्वन्ति अन्नानि च उत्पादयन्ति। अन्नं विना कुतः जीवनम् ? कृषिकार्य विना च कथम् अन्नानाम् उत्प भविष्यति ? अतः ग्रामाणां कृषकाणां च महत्त्वम् अस्ति। केचन ग्रामीणाः स्वगृहे स्थित्वा का कुर्वन्ति । यथा लौहकाराः लौहकार्यम् कुर्वन्ति, कुम्भकाराः घटान् रचयन्ति, तक्षकाः काष्ठेनमञ्च फलकान्, आसन्दिकाः च रचयन्ति। जलानाम् अभावे कृषिः अपि इष्टं फलं न ददाति । वस्तुतः जीवनम् अति कठिनम्। परम् ग्रामीणाः अल्पेन एवं सन्तुष्टाः भवन्ति।

**अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) भारतवर्षः कीदृशः देशः अस्ति?

(ii) लौहकाराः किं कुर्वन्ति?

(iii) कुम्भकाराः कान् रचयन्ति?

**आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **2×2=4**

(i) कृषकाः किं कुर्वन्ति?

(ii) तक्षकाः किं कुर्वन्ति?

(iii) जलानाम् अभावे किं भवति?

**इ. अस्य अनुच्छेदस्य कृते उचितं शीर्षक लिखत-** **1×1=1**

**ई. निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयम्)** **1×3=3**

(i) **'ग्रामीणाः अल्पेन एवं सन्तुष्टाः भवन्ति।'** अस्मिन् वाक्ये क्रियापदं किम्?

(क) ग्रामीणाः (ख) सन्तुष्टाः (ग) भवन्ति

(ii) '**सरलम्**' गद्यांशे इति पदस्य विपरीतपदं किम् ?

(क) फलम् (ख) कठिनम् (ग) अन्नम्

(iii) '**अत्र अनेके जनाः ग्रामेषु निवसन्ति।**' अस्मिन् वाक्ये कर्तृपद किम्?

(क) जनाः (ख) ग्रामेषु (ग) निवसन्ति

(iv) '**कृषिः अपि इष्ट फलं न ददाति**' अस्मिन् वाक्ये अव्ययपदं किम्?

(क) कृषिः (ख) अपि (ग) फलं

**खण्ड:-'ख' (रचनात्मक कार्यम्) 15 अङ्काः**

**2. मयंकस्य विद्यालये संस्कृत समारोहः अभवत्। एतत् विषये स्वअनुजं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुर्णपत्रं लिखत-** **½ x**10=5

ई-217(1)

नव दिल्ली

प्रिय अनुज (ii) --------

सादर नमस्कारः।

अहम् इदम् (iii) --------- इच्छामि यत् अस्माकं (iv) --------- संस्कृत समारोहः अभवत्। एतस्मिन् अवसरे (v) ---------- आयोजिता। इदं ज्ञात्वा भवान् (vi) ---------- अनुभविष्यति यद् अहं प्रतियोगितायां प्रथमं (vii) --------- प्राप्तम्। अन्यत् सर्व कुशलम्। शेषं पुनः (viii) --------। मातपितरौ (ix) -------- प्रणामाः।

भवदीयः (x)---------- ।

मयकः

| |
|---|
| मञ्जूषा - पुरस्कारम्, विद्यालये, वेदांशा, श्लोकोच्चारण-प्रतियोगिता, हर्षम् भ्राता, पुनीतनगरम् मम, लेखिष्यामि, निवेदयितुम् |

**3. अधः प्रदतं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत-**

**1×5=5**



**मञ्जूषा -**

| |
|---|
| **भल्लूकः, नृत्यम्, डमरु, मनोरञ्जनम्, नृत्यति, बालकाः,डिम-डिम, रज्जुः, संकेतेन एकत्रिताः** |

**अथवा**

**4. अधोलिखितपदानां सहायतया कथासु रिक्तस्थानानि पूरयत -** **½ x10=5**

नृपतिः दिलीपः धेनोः सेवायां -----------आसीत्। एकदा नृपतिः------------ शोभायाः दर्शने निमग्नः आसीत्। सहसा सः --------- आक्रन्दन-ध्वनिम् आकर्णयत्। तत्कालं तत्र ---------सः अपश्यत् यत् एकस्य -------------- आक्रमणेन सा धेनुः व्याकुला भीता चास्ति। नृपतिः सिंहम् अवदत् - "भोः सिंह, मम -------- खादित्वा त्वं स्वबुभुक्षां शमय, एतां मम गुरोः धेनुं च त्यज।" यावत् दिलीपः सिंहस्य समीपे अगच्छत्, सः तत्र ------ न अपश्यत्। सा धेनुः नृपतिम् मनुष्यवाचा अवदत्-त्वं ----------- उत्तीर्णः असि यतः त्वं ----------- अपि मम रक्षायै तत्परः असि। अत्र सिंहः न अस्ति। सा तु मम ---------- आसीत्। उत्तिष्ठ, त्वं सर्वगुणसम्पन्नं------------ प्राप्स्यसि।

| |
|---|
| मांसम्, माया, धेनोः, वनस्य, गत्वा, तत्परः, पुत्रम् परीक्षायाम्, सिंहं, स्वप्राणैः सिंहस्य, |

**अथवा**

**मञ्जूषाया: सहायतया अधोलिखितं संवादं पूरयत।** **1×5=5**

प्रियसखि लते ! किमर्थं व्याकुला असि ?

(i)-----------------------------------------------------------

एवम्। किं तव माता अपि गृहे नास्ति ?

(ii)-----------------------------------------------------------

तर्हि त्वम् मया सह चल। मम गृहे भोजनं कुरु। पश्चात् आवां चिकित्सालयं गमिष्यावः।

(iii)-----------------------------------------------------------

शृणु। मम पिता अपि तस्मिन्नेव चिकित्सालये चिकित्सकः अस्ति।

(iv)-----------------------------------------------------------

आम् अवश्यमेव। स न केवलं चिकित्सकः अपितु अतीव सहृदयः अपि। तन्न भेतव्यम्। स् परोपकारः कर्तव्यः प्राणैरपि धनैरपि।

(v)-----------------------------------------------------------

मञ्जूषा

| |
|---|
| **(क) भोजनं नेच्छामि। मम माता प्रातः एव भोजनं सिद्धं कृत्वा गता।** |
| **(ख) अहं चिकित्सालये तेन सह वार्ता करिष्यामि।** |
| **(ग) मम माता अपि सेवार्थं चिकित्सालयं गता।** |
| **(घ) मम पिता अतीव रुग्णः, सर्वकारीयचिकित्सालये प्रवेशितः ।** |
| **(ङ) किं सः गृहे मम वार्ता श्रोष्यति ?** |

## खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्) (25) अङ्का:

**5. अधोलिखितपदानां वर्णसंयोजनं वर्णविच्छेदं वा कुरूत -** **½x2=1**

(अ) **वर्णसंयोजनं (केवलं प्रश्नद्वयम्)**

(i) श् + र् + ई + म् + अ + न्

(ii) क् + ऋ + त् + व् आ

(ii) क् + आ + र् + य् + अ + म्

**(आ) वर्णविच्छेदं (केवलं प्रश्नद्वयम्)** **½x2=1**

(i) आश्चर्यम्

(ii) मार्मिकम्

(iii) प्रयोजनम्

**6. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत- (केवलं प्रश्नत्रयम्)** **1×3=3**

(i) **<u>विद्यार्थी</u>** आलस्यं त्यजेत्।

(ii) श्रावणमासस्य पूर्णिमायां **वनोत्सवः** भवति।

(iii) जनाः **यन्त्र + आलयानां** प्रदूषितपदार्थान् नद्यां न क्षिपेयुः।

(iv) सत्सङ्गतिः **माता + इव** रक्षति।

**7. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितशब्दरूपं चित्वा रिक्तस्थानं पूरयित्वा पूर्णवाक्यं लिखत - (केवलं प्रश्नत्रयम्)** **1×3=3**

(i) ------ गृहम् अतीव सुन्दरम् अस्ति।

(क) लता (ख) लताम् (ग) लतायाः

(ii) त्वं ------ रसं पिब।

(क) फलम् (ख) फलस्य (ग) फलाय

(iii) ------- ध्यानेन पाठं पठथः।

(क) त्वम् (ख) युवाम् (ग) यूयम्

(iv) ------- बालकस्य नाम किम् अस्ति ?

(क) तम् (ख) तान् (ग) तस्य

**8. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रयुज्य पूर्ण वाक्यं लिखत- (केवलं प्रश्नत्रयम्)** **1×3=3**

(i) कालिदासः------ नाटकानि अरचयत्। (3)

(ii) उद्याने ------ आम्रवृक्षाः सन्ति। (11)

(iii) देवालये ------ भक्तजनाः सन्ति। (49)

(iv) मम कक्षाया ------ छात्राः संस्कृतं पठन्ति। (37)

**9. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत- 1x4=4**
**(केवलं चतुष्ट्यम्)**

(i) विद्यालयं परितः छात्राः सन्ति।

(ii) गोपालः मित्रैः सह क्रीडति।

(iiग) मह्यम् क्रीडनं रोचते।

(iv) युष्मभ्यम् स्वस्ति।

(v) कृषकः क्षेत्रं प्रति गच्छति।

**10. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा रिक्तस्थानानि पूरयित्वा पूर्णवाक्यं लिखत-(केवलं प्रश्नत्रयम्) 1×3=3**

(i) श्वः वयं गृहे दूरदर्शने एक चित्रं..................

(क) द्रक्ष्यामि (ख) द्रक्ष्यावः (ग) द्रक्ष्यामः

(ii) विद्याहीनाः छात्राः कुत्रापि न..................

(क) लभते (ख) लभेते (ग) लभन्ते

(iii) यूयम् पाठं ध्यानेन......

(क) स्मर (ख) स्मरतम् (ग) स्मरत

(iv) त्वं विद्यालयं यथासमयं................

(क) गच्छेत (ख) गच्छेः (ग) गच्छेतम्

**11. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णवाक्यं लिखत-(केवलं प्रश्नत्रयम्) 1×3=3**

(i) काक: लज्जित:भूत्वा विचारयति।

(ii) अङ्कितः क्रीडाक्षेत्रात् आ + गम् + ल्यप दुग्धं पिबति।

(iii) सुरेशः हसित्वा वदति।

(iv) जनः बालकाय पुस्तकं प्र+ दा + ल्यप् विद्यालयं गच्छति।

**12. मञ्जूषायां प्रदतैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा पूर्णवाक्यं लिखत-(केवलंप्रश्नद्वयम्) 1x2=2**

(i) ------ अहम् आगरानगरम् अगच्छम्।

(ii) यदा वर्षा भवति----- मयूराः नृत्यन्ति।

(iii) तव पिता दिल्लीनगरं------- गच्छति?

**(मञ्जूषा- एकदा, किमर्थम्, तदा)**

**13. अधोलिखितवाक्येषु रेखाङ्कितपदेषु उपसर्ग पृथक् कृत्वा संयोज्य वा लिखत- 1x2=2**
**(केवलंप्रश्नद्वयम्)**

(क) अम्बा बालाय दुग्धम् आ + नयति।

(ख) सज्जनाः सदैव जनान् उपकुर्वन्ति।

(ग) नृपः सेवकं निर्दिशति।

**खण्डः 'घ' (पठित-अवबोधनम्) (30 अङ्काः)**

**12. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

भारते अनेके महापुरुषाः अभवन्। महर्षिः दयानन्दः तेषु प्रमुखः आसीत्। तस्मिन् काले समाजे अनेकाः कुरीतयः प्रचलिताः आसन; यथा अन्धविश्वासः, स्त्री-अशिक्षा, बाल-विवाहः जातिप्रथा इत्यादयः। एताः सर्वाः निवारयन् वेदधर्मं च प्रचारयन् महर्षिः भारते सर्वत्र अभ्रमत्। सत्यासत्यस्य ज्ञानार्थं सः एकं प्रसिद्ध ग्रन्थं 'सत्यार्थप्रकाशम्' अपि रचितवान्। महर्षिः दयानन्दः अतीव क्षमाशीलः अपि आसीत्।

**अ. एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) ½ x2=1**

(i) महर्षिः दयानन्दः किं रचितवान् ?

(ii) महर्षिः दयानन्दः कीदृशः आसीत् ?

(iii) भारते के महापुरुषाः अभवन् ?

**आ. एकवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्) 1x2=2**

(i) महर्षिः दयानन्दः किमर्थं भारते सर्वत्र अभ्रमत्?

(ii) महर्षेः दयानन्दस्य काले काः कुरीतयः प्रचलिताः आसन्?

(iii) महर्षिः दयानन्दः तेषु कीदृशः आसीत्।

**इ. निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम्) 1x2=2**

(i) '**भारते अनेके महापुरुषाः अभवन्।**' अस्मिन् वाक्ये '**अभवन्**' इति क्रियापदस्य कर्तृपदं किं ?

(क) भारते (ख) महापुरुषाः (ग) अनेके

(ii) '**महर्षिः दयानन्दः**' अस्मिन् वाक्ये विशेषणपदं किम्?

(क ) महर्षिः (ख) दयानन्दः (ग) ग्रन्थम्

(iii) '**महर्षिः दयानन्दः भारते सर्वत्र अभ्रमत्।**' अत्र क्रियापदं किम्?

(क ) महर्षिः (ख) दयानन्दः (ग) अभ्रमत्

**15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा न्यायात्पथः प्रविचलन्ति पदं न धीराः ।।

अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम्।।

**अ. एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्)** **½x2=1**

(i) के निन्दन्तु यदि वा स्तुवन्तु ?

(ii) धीराः कुतः पदं न प्रविचलन्ति?

(iii) के केवलं धनम् इच्छन्ति?

**आ. एकवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्)** **1x2=2**

(i) का समाविशतु यथेष्टं वा गच्छतु?

(ii) मरणं कदा भवतु?

(iii) मध्यमाः जनाः किं किम् इच्छन्ति?

**इ. निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम्)** **1x2=2**

(i) 'धैर्यवन्तः' इति पदस्य किं पर्यायपदं श्लोके प्रयुक्तम्?

(क) नीतिनिपुणाः (ख) धीराः (ग) लक्ष्मीः

(ii) **'न्यायात्पथः पदं न प्रविचलन्ति।'** अस्मिन् वाक्ये अत्र क्रियापदं किम्?

(क) न्यायात् (ख) पदम् (ग) न

(iii) **'उत्तमाः मानम् इच्छन्ति'** अस्मिन् वाक्ये **'उत्तमाः'** इति कर्तृपदस्य क्रियापदं किम्?

(क) उत्तमाः (ख) मानम् (ग) इच्छन्ति

**16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

प्रणवः- लौकिकसंस्कृतस्य अन्ये प्रमुख प्रमुखाः ग्रन्थाः के? के च तेषां प्रणेतारः?

प्रज्ञा- महाभारतं व्यासेन विरचितम्।

रमेशः - रघुवंश कुमारसम्भवं च कालिदासेन रचिते महाकाव्ये।

शुभ्रा-कालिदासेन एवं रचितानि अभिज्ञान शाकुन्तलं, मालाविकाग्निमित्रं विक्रमोवर्सशीयं च एतानि त्रीणि नाटकानि।

वरुणः- शिशुपालपवधम् माधेन रचितं काव्यम्।

गौरवः - नीतिशतकम् भर्तृहरिणा लिखितम्।

नीतिशः- पञ्चतन्त्रम् विष्णुशर्मणा लिखितम्।

बलवीरः - कादम्बरी बाणभट्टन विरचिता कथा।

**अ. एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्)** **½x2=1**

(i) पञ्चतन्त्रम् केन लिखितम् ?

(ii) माघेन किं काव्यं रचितम् ?

(iii) कादम्बरी केन विरचिता ?

**आ. एकवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्)** **1x2=2**

(I) कालिदासेन कानि नाटकानि रचितानि?

(II) व्यासेन किं ग्रन्थं विरचितम् ?

(iii) महाभारतं केन विरचितम्?

**इ. निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम्)** **1x2=2**

(i) 'लौकिकसंस्कृतस्य प्रमुखाः ग्रन्थाः के?' अस्मिन् वाक्ये विशेष्यपदं किम् ?

(क ) लौकिकसंस्कृतस्य (ख) प्रमुखा: (ग) ग्रन्था

(ii) 'नीतिशतकम्' भर्तृहरिणा लिखितम्।' अस्मिन् वाक्ये क्रियापदं किम्?

(क ) भर्तृहरिणा (ख) लिखितम् (ग) नीतिशतकम्

(iii) 'कालिदासेन रचिते महाकाव्ये' अस्मिन् वाक्ये ''कालिदासेन' इति कर्तृपदस्य क्रियापदं किम्?

(क ) कालिदासेन (ख) रचिते (ग) महाकाव्ये

**17. श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत-** **1x 4=4**

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुःखभाग् भवेत्।।

**अन्वयः**- सर्वे सुखिनः (1) ....... सर्वे (2)---- सन्तु। सर्वे (3)----- पश्यन्तु। कश्चित् दुःखभाग् (4)----- भवेत्।

| **मञ्जूषा- निरामयाः, मा , भद्राणि , भवन्तु** |
|---|

**अथवा**

**मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा पूर्ण भावार्थ लिखत-**

**(ख) सर्वस्य लोचनं शास्त्रम्।**

भावार्थ: शास्त्राणां ज्ञानम् एव (1)----- वास्तविकं नेत्रम् अस्ति। (2)----- एव मानवस्य (3)----- सिध्यन्ति। अतः शास्त्राणां (4) .......... प्राप्तुं सदैव तत्परा: भवेयुः।

| मञ्जूषा - कार्याणि, ज्ञानं, मनुष्यस्य, ज्ञानशक्त्या |
|---|

**18. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्ण वाक्यं लिखत-(केवलं चतुष्ट्यम्)** **1x 4=4**

(क) चटका **काकं** कथयति।

(ख) महर्षिः दयानन्दः **काशीनगरे** अतिष्ठत्।

(ग) संसारे **सत्यस्य** जयः भवति।

(घ) **नद्याः** जलं प्रदूषितं न करणीयम्।

(ङ) नीतिशतकम् **भर्तृहरिणा** लिखितम्।

**19. मञ्जूषायां प्रदत्तपदेभ्यः समुचितंपदं चित्वा अधोलिखितां कथां पूरयत- ½x6=3**

**महर्षिः दयानन्दः वेदधर्मं प्रचारयन् (i)------------ सर्वत्र अभ्रमत्। सत्यासत्यस्य ज्ञानार्थं सः एकं प्रसिद्ध ग्रन्थं सत्यार्थप्रकाशं अपि रचितवान् । एकदा सः गङ्गायाः तटे स्वशिष्यैः सह अतिष्ठत् । तत्र समीपम् एव एकः यात्री अपि अतिष्ठत्, सः (ii)------------ दुर्वचनानि वदति स्म। शिष्याः क्रुद्धाः अभवन्। महर्षिः तान् कथयति स्म यत् सः स्वयम् एव एकस्मिन् दिने सरलः भविष्यति। महर्षिः दयानन्दः तस्मै (iii)---------- फलानि प्रेषितवान् । तथापि सः यात्री दुर्वचनानि अकथयत्। पुनः (iv) --------- सन्देशेन सह फलानि प्रेषितवान्। शिष्यः यात्री समीपं गत्वा सन्देशम् अकथयत् - "(v)--------------- अमृतवर्षया बहुशक्तिः नष्टा । पुनः अमृतवर्षायै शक्तिं प्राप्तुम् एतानि मधुराणि रसयुक्तानि फलानि स्वीकरोतु ।" अन्ते यात्री लज्जितः (vi) ------------ महर्षिं क्षमाम् अयाचत् ।**

| **मञ्जूषा - महर्षिः, भूत्वा, यात्रिणे , महर्षिम् , भारते , भवतः** |
|---|

**20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत- 1x 4=4**

| | |
|---|---|
| (i) सन्तः | (क) संसारे |
| (ii) सागरम्। | (ख) रचयिता |
| (iii) विश्वे | (ग) सज्जनाः |
| (iv) प्रणेता | (घ) समुद्रम् |